दैत्यो मे वायुरूपवरोऽच्छिनत् । अष्टमे मासि सम्पूर्णे प्रविश्योमोदरं शिरः । तमिदानीं हनिष्येऽहं गजास्यं साम्प्रतं द्विज ! । शिवउवाच । श्रुत्वैवं नारदः प्राह शिशुरूपिणमीश्वरम् । नारदउवाच । अकिञ्चिज्ज्ञा वयं देव ! योजनेऽस्य सुखस्य ते । त्वमेव च स्वभावेन सुखमेतन्नियोजय । शिवउवाच । वदतीत्थं मुनि यावत्तावत् स ददृशेऽखिलैः। सर्वावयवसम्पूर्णो गजाननउमासुतः । कीरीटकुण्डलधरो युगबाहुः सुलोचनः । वामदक्षिणभागे च सिद्धिबुद्धिविराजितः । दृष्ट्वा विनायकं स्कन्द ! तथाभूतं निजेच्छया । हर्षेणोत्फुल्लनयना देवाः सर्वे तदाऽब्रुवन् । गजानन इति ख्यातो भवितायं जगत्त्रये" "एवं भाद्रचतुर्थ्यां स अवतीर्णो गजाननः" इति च तत्राध्याये । ६त०। हस्तिमुखे न०।

**गजारि** पु०६त०। १सिंहे । २वृक्षभेदे हड्डचन्द्रः। ३शिवे च गजासुरद्वेषिशब्दे दृश्यम् । [ (माङ्गत) अमरः

**गजारोह** पु० गजमारोहति आ+रुह–अण् । १हस्तिपाले

**गजा(द)शन** पु० गजैरश्य(द्य)ते कर्मणि ल्युट् । १अश्वत्थद्रुमे । २शल्लक्यां स्त्री ङीप् । ३गजभक्षायाम् (भाग शब्दच० ४पद्ममूले न० रत्ना० ।

**गजासुर** पु० गजाकारोऽसुरः । असुरभेदे ।

तस्योत्पत्तिकथा च स्कन्दपु० गणेशख० १०अ० यथा "साम्प्रतं कथयिष्यामि गजासुरकथानकम् । पुरा युगे स राजासीन्नीतिज्ञो लोकपालकः । लक्ष्मीवान् रूपसम्पन्नो वेदशास्त्रार्थकोविदः । देवद्विजार्चनरत आत्मविद्याविशारदः" । "महेश इति नाम्ना च विख्यातो भुवनत्रये" इत्युपक्रम्य "उत्पत्तिमाप्स्यते राजन् त्वया योनौ गजस्य हेति" गुरुवाक्यमुपन्यस्य "कदाचिद्गच्छता तेन वीक्षितो नारदः पथि । अवमन्य ययौ तं तु सप्तोऽसौ मुनिना रुषा । इभास्यो भवितासि त्वमौद्धत्यादन्यजन्मनि । गजासुर इति ख्यातिं यास्यसि त्वं नराधिप ! । कैलासे प्राप्स्यसे स्थानमन्ते तस्यैव जन्मनि । अवमन्य यतो यातो मामिदानीं नराधम ! । इत्युक्त्वान्तर्हितो भूत्वा स स्वयं नारदो मुनिः । गुरुनारदवाक्याभ्यां महेशो विस्मयं गतः । गते बहुतिथे काले राजा पञ्चत्वमाप सः । पर्णलोकानने स्कन्द ! करिण्यां जनिमाप सः। इभास्यो बलवान् वीरः सर्वत्रासौ नराकृतिः" ।

**गजासुरद्वेषिन्** पु० गजासुरं द्वेष्टि द्विष–णिनि ६त० । महादेवे कृत्तिवासःशब्दे विवृतिः ।

स्कन्दपु०गणेशख० १०अ० तु तं हत्वा तस्य स्वभक्तिमालक्ष्य तच्चर्मधारणं तच्छिरसः कैलासे स्थापनञ्च वर्णितं यथा "जघान तं त्रिशूलेन स्कन्द! कोपात् गजासुरम्" इत्युपक्रम्य "तव हस्ताद्भून्मृत्युरन्ते ते दर्शनं यतः । उक्तञ्च गुरुणा पूर्वं भविष्यं नारदेन च । कैलासन्तु गते तस्मिन् गृह्यास्य चर्म चाननम् । चर्मणः परिधानञ्च मुखस्यापि प्रपूजनम् । भक्तवात्सल्यभावेन क्रियतेऽद्यापि षण्मुख !" । अस्यैव शिरसा विमस्तकस्य विनायकस्य गजाननतेति गजाननशब्दे दर्शितम् ।

**गजास्य** पु० गजस्यास्यमास्यमस्य । १गणेशे हेम० । ६त० । २हस्तिवदने न० । गजस्यास्यमिवास्यं यस्य । ३गजासुरे पु० गजासुरशब्दे दृश्यम् ।

**गजाह्व** न०गजसहिता आह्वा यस्य शाक० त० । १हस्तिनापुरे मेदि० । गजाह्वयमप्यत्र । "युधिष्ठिरस्यानुमते वनवासात् गजाह्वयम्" भा० व० ६अ० । २तत्पुरयुक्ते देशभेदे तद्वासिषु तन्नृपेषु च पु० बहुव०, स च देशः बृहत्सं० १४अ० कूर्मविभागे मध्यस्थतयोक्तः । "गजाह्वयाश्वेति मध्यमिदम्" । [मेदि०। २हस्तिनापुर्याञ्च ।

**गजाह्वा** स्त्री गजोपपदा आह्वा अस्याः । १गजपिप्पल्याम्

**गजेन्द्र** पु० गज इन्द्र इव व्याघ्रा०उपमितस०, ६त०वा । १श्रेष्ठगजे । २गजयूथपतौ च । "नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः" माघः । अगस्त्यशापेन गजेन्द्रतां प्राप्ते ३इन्द्रद्युम्ननृपे च तस्य तथाशापादिकथा भाग०८स्क०४अ०उक्ता यथा

"स वै पूर्वमभूद्राजा पाण्ड्योद्रविडसत्तमः । इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः । स एकदाऽऽराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिम् । जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः । यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः । तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ! तस्मादिमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य । विप्रावमन्ता विशतां तमिस्रं यथा गजस्तब्धमतिः स एव । श्रीशुक उवाच । एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप ! सानुगः । इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् । आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम् । हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः" ।

ततः तच्छापेन गजेन्द्रतां प्राप्तस्य कदाचित् त्रिकूटपर्वते वरुणोद्यानस्थसरसि निमग्नस्य ग्राहेण ग्रहणे